भूयमाने लोके इहलोके भवः ठक् अनुश० द्विपदवृद्धिः ऐहलौकिक तद्भवे त्रि० ।

इहामुत्र अव्य० इह च अमुत्र च द्व०। एतल्लोके परलोके च "इहामुत्रार्थफलभोगविरागः" वेदा०सा० ।

इति वाचस्पत्ये इकारादिवर्णशब्दार्थनिरूपणम् ।

# ई

ई अव्य० ई क्विप् । १ विषादे २ दुःखभावनायाम् ३क्रोधे ४अनुकम्पायाम् ५प्रत्यक्षे ६सन्निधौ ७संबोधने च । मेदिन्यामयं सान्ततया पठितः । पृषो०साधुः ।

ई स्त्री अस्य विष्णोः पत्नी ङीष् । लक्ष्म्याम् ।

ई कान्तौ (इच्छायाम्) गतौ व्याप्तौ क्षेपे भोजने सक० गर्भग्रहणे अक० अदादि अनिट् पर० । एति इतः यन्ति । ऐत् । ऐषीत् । इयाय इयतुः । एता एष्यति ऐष्यत् । "ईतः । अस्यात्मनेपदित्वमपि "न हि तरणिरुदीते" दिक्पराधीनवृत्तिः" कविक० टी०दुर्गा० ।

ई याचने द्विक० आत्मने० अदादि अनिट् निरु० । ईते ईयीत ईताम् । ऐत । ऐष्ट । इये । "आ वोदेवास ईमहे वामं प्रत्यध्वरे" यजु० ४,५ । "अजस्रं घर्ममीमहे" यजु० २६,६ ।

ई गतौ दिवा०सक० अनिट् आत्म० । ईयते ऐष्ट । ईतः "पद्मैरन्वीतवधूमुखद्युतः" माघः । ईङ्—गतौ मल्लि० ।

ईक्ष दर्शने पर्य्यालोचने च भ्वा० आत्म० सक० सेट् । ईक्षते ईक्षेत ईक्षताम् ऐक्षत ऐक्षिष्ट ईक्षाम्-बभूव आस-चक्रे-ईक्षिता ईक्षिषीष्ट ईक्षिष्यते ऐक्षिष्यत । ईक्षितव्यः ईक्षणीयः ईक्ष्यः ईक्षिता ईक्षितः ईक्षित्वा वीक्ष्य । ईक्षणम् ईक्षा । ईक्षमाणः । कर्म्मणि ईक्ष्यते ईक्ष्यमाणः । धातुनिर्देशे इक्षतिः ईक्षिः । "न धर्म्मवृद्धेषु वयः समीक्ष्यते" न कामवृत्तिर्वचनीयमीक्षते" कुमा० । "तदैक्षत बहु स्यां प्रजायेय" श्रुतिः । "स प्रजापतिरीक्षां चक्रे" श्रुतिः "सर्व्वभूतस्थमात्मानं सर्व्वभूतानि चात्मनि । ईक्षते योगयुक्तात्मा" गीता । "कथमीक्षामहे सर्वे, दुर्य्योधन! तवेप्सितम्" भा०व०२६८श्लो० । "ऐक्षिष्ट पुंभिः प्रचितान् स गोष्ठान्" भट्टिः वेदे पदव्यात्यासोऽपि "कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन्" कठो० । दृष्टेन शुभाशुभालोचने च तद्योगे शुभाशुभसंबन्धिनि चतुर्थी । "राधीक्ष्योर्यस्य विप्रश्नः" पा०। "यदीयः विविधः प्रश्नः क्रियते तस्मिन् चतुर्थीत्यर्थः । "कृष्णाय ईक्षते गर्गः पृष्टो गर्गः शुभाशुभं पर्य्यालोचयतीत्यर्थः" सि०कौ०। "ईक्षतेर्नाशब्दम्" शा०सू० । "कारणे ईक्षितृत्वश्रवणात्" भा० ।

अधि+विवेचने अधीक्षते "कुहकचकितोलोकः सत्येऽप्यपायमधीक्षते" हितो० ।

अनु+अनुचिन्तने । "तामन्वीक्षत इयं वै वल्मीकवपेयम्" शत०ब्रा० ६,२,२,५ । "अन्वीक्षमाणोरामस्तु विषस्य भ्रान्तचेतनम्" रामा० ।

अप—आकाङ्क्षायामनुरोधे अवधिनियमे च । "अपेक्षते प्रत्ययमुत्तमं त्वाम्" कुमा० "अपेक्षन्ते न च स्नेहं न पात्रं न दशान्तरम् । परोपकारनिरतामणिदीपा इवोत्तमाः" उद्भटः । "किमपेक्ष्य फलम् पयोधरान् ध्वनतः प्रार्थयते मृगाधिपः" किरा० । "द्वित्वादयः परार्द्धान्ता अपेक्षाबुद्धिजामताः""अपेक्षाबुद्धिनाशाच्च तेषां नाशः प्रकीर्तितः" भाषा० "शब्दोव्यञ्जकत्वेऽर्थान्तरमपेक्षते" सा०द० । "सापेक्षत्वेऽपि गमकत्वात् समासः" पा०भा० "सा प्रक्रिया या कथमित्यपेक्षा" मीमा० । "नदीशः परिपूर्णोऽपि मित्रोदयमपेक्षते" चन्द्रा० ।

वि+अप+विशेषेणापेक्षयाम् । "न व्यपैक्षत समुत्सुकाः प्रजाः" रघु० । "व्यपेक्षमाणौ सहसीतयागतौ" रामा० "समर्थः पदविधिः" पा०भा० व्यपेक्षाऽव्यपेक्षापक्षद्वयमुपन्यस्तम् । तत्र व्यपेक्षापक्षोमतान्तरेण उपन्यस्तः स च युक्तिविरुद्धत्वात् कैयटविवरणादौ दूषितः "वाक्यवत् सा व्यपेक्षाऽपि वृत्तावपि न हीयते" भर्तृ० । सा च शब्दबोधिपयोगिन्याकाङ्क्षारूपा आकाङ्क्षाशब्दे विवृतिः।

अव+ चाक्षुषदर्शने । "योत्स्यमानानवेक्षेऽहं य एतेऽत्र समागताः" गीता । "अवेक्षमाणोमहतीं मुहुर्मुहुः" माघः सम्यक्पर्य्यालोचने च । "यदवोचदवेक्ष्य सुन्दरी" किरा०।

अनु+ अव+पर्य्यालोचने अनुसन्धाने च "सूक्ष्मतां चान्ववेक्षेत योगेन परमात्मनः" मनुः ।

अभि+अव+भोजनार्थेक्षणे । "यजमानस्य पशूनभ्यवेक्षते" शत० ब्रा० ११,१,५,११, "अभ्यवेक्षते अभ्यवहर्तुं पश्यति" भा० ।

परि+अव+समन्ताद्दर्शने । "ततो वाचस्पतिर्जज्ञे तं मनः पर्य्यवेक्षते भा० आश्व०२१अ० ।

प्रति+अव+ प्रतीत्य पर्य्यालोचनया दर्शने । "अथेमां प्रत्यवेक्षमाणो जपति" शत०ब्रा० ५,२,४,२० ।